उत्तरषट्कनिरुक्तप्रारंभः

Uttarshatanisukta prarambham

३/२४ (०)

18 Vm

204

श्रीगुरुभ्यो नमः॥ हरिः ॐ॥ अथातो दैवतं तद्यानि नामानि प्राधान्यस्तुती
॥१॥ नां देवतानां तद्दैवतमित्याचक्षते सैषा देवतोपपरीक्षा यत्काम ऋषिर्यस्यां दे
वतायामार्थपत्यमिच्छन्स्तुतिं प्रयुंक्ते तद्दैवतः स मंत्रो भवति तास्त्रिवि
धा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च तत्र परोक्षकृताः स
र्वाभिर्नामविभक्तिभिर्युज्यंते प्रथमपुरुषैश्चाख्यातस्य॥१॥ इंद्रो दिव इंद्र ई
शे पृथिव्याः॥ इंद्रमिद्गाथिनो बृहत्॥ इंद्रेणैते तृत्सवो वेविषाणाः॥ इंद्राय साम गाय
त॥ नेंद्रादृते पवते धाम किंचन॥ इंद्रस्य नु वीर्याणि प्रवोचम्॥ इंद्रे कामा अयंसतेत्य
थ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना त्वमिंद्र बलाद ॥१॥
धि॥ वि न इंद्र मृधो जहीत्यथापि प्रत्यक्षकृताः स्तोतारो भवंति। परोक्षकृतानि स्तो

तव्यानि। मा चिदन्यद्वि शंसत। कण्वा अभि प्रगायत। उप प्रेत कुशिकाश्चेतयध्वमि
त्यथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना यथैतदिंद्रो वैकुंठो
लवसूक्तं वागांभृणीयमिति॥२॥ परोक्षकृताः प्रत्यक्षकृताश्च मंत्रा भूयिष्ठा
अल्पश आध्यात्मिका अथापि स्तुतिरेव भवति नाशीर्वादः॥ इंद्रस्य नु वीर्या
णि प्रवोचमिति यथैतस्मिन्सूक्ते अथाप्याशीरेव न स्तुतिः॥ सुचक्षा अहमक्षी
भ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति तदेतद्बहुलमाध्व
र्यवे याज्ञेषु च मंत्रेषु अथापि शपथाभिशापौ॥ अद्या मुरीय यदि यातुधानो अस्मि॥
अधा स वीरैर्दशभिर्वियूयाः॥ इत्यथापि कस्यचिद्भावस्याचिख्यासा॥ न मृत्यु
रासीदमृतं न तर्हि॥ तम आसीत्तमसा गूढमग्रे॥ अथापि परिदेवना कस्मा

उ०नि० ७१

च्छिद्रावादुः॥ सुदेवोऽअद्य प्रपतेदनावृत्॥ न विजानामि यदिवेदमस्मीत्यथापि

॥२॥ निंदाप्रशंसे॥ केवलाघो भवति केवलादी॥ भोजस्येदं पुष्करिणीव वेश्मेत्ये

वमक्षसूक्ते द्यूतनिंदा च कृषिप्रशंसा चैवमुच्चावचैरभिप्रायैर्ऋषीणां मंत्रदृष्ट

यो भवंति॥२॥ तद्येनादिष्टदेवता मंत्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो

वा यज्ञांगं वा तद्देवता भवंत्यथान्यत्र यज्ञात्प्राजापत्या इति याज्ञिका नाराशंसा

इति नैरुक्ता अपि वा सा कामदेवता स्यात्प्रायोदेवता वाऽस्ति ह्याचारो बहुलं लो

के देवदेवत्यमतिथिदेवत्यं पितृदेवत्यं याज्ञदैवतो मंत्र इत्यपि ह्यदेवता देवत ॥२॥

ख वत्स्तूयंते यथाश्वप्रभृतीन्योषधिपर्यंतान्यथाप्यष्टौ द्वंद्वानि स न मन्येतागं

तूनिवाऽर्थान्देवतानां प्रत्यक्षदृश्यमेतद्भवति माहाभाग्याद्देवताया एक आत्मा

Uttarshatakniruktaprarambham

उत्तरषट्कनिरुक्तप्रारंभः

3/22 [illegible]

18 Vm

604

बहुधास्तूयतेएकस्यात्मनोऽन्येदेवाःप्रत्यंगानिभवंत्यपिचसत्वानांप्रकृ
तिभूमभिर्ऋषयःस्तुवंतीत्याहुःप्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानो
भवंतीतरेतरप्रकृतयःकर्मजन्मानआत्मजन्मानआत्मैवैषांरथोभवत्यात्मा
श्वआत्मायुधमात्मेषवआत्मासर्वंदेवस्यदेवस्य॥४॥तिस्रएवदेवताइ
तिनैरुक्ताअग्निःपृथिवीस्थानोवायुर्वेंद्रोवांतरिक्षस्थानःसूर्योद्युस्था
नस्तासांमहाभाग्यादेकैकस्यापिबहूनिनामधेयानिभवंत्यपिवाकर्मपृ
थक्त्वाद्यथाहोताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्यसतोऽपिवापृथगेवस्युःपृथग्घि
स्तुतयोभवंतितथाभिधानानियथोएतत्कर्मपृथक्त्वादितिबहवोपिविभ
ज्यकर्माणिकुर्युस्तत्रसंस्थानेकत्वंसंभोगैकत्वंचोपेक्षितव्यंयथापृथिव्यां

रन

उ०नि०

अ५

श्री मनुष्याःपशवोदेवाइतिस्थानानेकत्वंसंभोगैकत्वंचदृश्यतेयथापृथिव्याःपर्ज
॥३॥ न्येनचवाय्वादित्याभ्यांचसंभोगोऽग्निनाचेतरस्यलोकस्यतत्रैतन्नरराष्ट्रमि
व॥५॥अथाकारचिंतनंदेवतानांपुरुषविधाःस्युरित्येकंचेतनावद्धिस्तुत
योभवंतितथाभिधानान्यथापिपौरुषविधिकैरंगैःसंस्तूयंते॥ऋष्वातइंद्र
स्थविरस्यबाहू॥यत्संगृभ्णामघवन्काशिरित्ते॥अथापिपौरुषविधिकै
र्द्रव्यसंयोगैः॥आद्वाभ्यांहरिभ्यामिंद्रयाहि॥कल्याणीर्जाया।सुरणंगृहेते।
अथापिपौरुषविधिकैःकर्मभिः॥अद्धींद्रपिबचप्रस्थितस्य॥आश्रुत्कर्णश्रु
धीहवं।अपुरुषविधाःस्युरित्यपरमपितुयद्दृश्यते॥६॥अपुरुषविधंतद्यथा ॥३॥
ग्निर्वायुरादित्यःपृथिवीचंद्रमाइतियथोएतच्चेतनावद्धिस्तुतयोभवंती

॥४॥ स्त्रियोऽथास्य कर्म वहनं च हविषामावाहनं च देवतानां यच्च किंचिद्दा
र्ष्टिविषयिकमग्निकर्मैव तदथास्य संस्तविका देवा इंद्रः सोमो वरुणः पर्जन्य
ऋतवश्चाग्नावैष्णवं च हविर्न त्वृक्संस्तविकी दशतयीषु विद्यतेऽथाप्याग्नापौ
ष्णं हविर्न तु संस्तवस्तत्रैतां विभक्तिस्तुतिमृचमुदाहरंति ॥८॥ पूषा त्वेत
श्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः ॥ स त्वैतेभ्यः परिददत्पितृभ्यो
ऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥ पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवन घ्र
स्य गोपा इत्येष हि सर्वेषां भूतानां गोपायितादित्यः स त्वैतेभ्यः परिददत्पितृभ्य
इति सांपरायिकस्तृतीयः पादः पूषा पुरस्तात्तस्यान्वादेश इत्येकमग्निरुप ॥४॥
रिष्टात्तस्य प्रकीर्तनेत्यपरं ॥ अग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥ सुविदत्रं धनं

वति विंदतेर्वैकोपसर्गाद्ददातेर्वा स्याद्द्व्युपसर्गात् ॥ ९ ॥ अथैतानींद्रभक्तीन्यंतरि
क्षलोको माध्यंदिनं सवनं ग्रीष्मस्त्रिष्टुप् पंचदशस्तोमो बृहत्साम ये च देवग
णाः समाम्नाता मध्यमस्थाने याश्च स्त्रियोऽथास्य कर्म रसानुप्रदानं वृत्रवधो
या च का च बलकृतिरिंद्रकर्मैव तदथास्य संस्तविका देवा अग्निः सोमो वरुणः
पूषा बृहस्पतिर्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुरथापि मित्रो वरुणेन सं
स्तूयते पूष्णा रुद्रेण च सोमोऽग्निना च पूषा वातेन च पर्जन्यः ॥ १० ॥ अथैतान्या
दित्यभक्तीन्यसौ लोकस्तृतीयसवनं वर्षा जगती सप्तदशस्तोमो वैरूपं सा
म ये च देवगणाः समाम्नाता उत्तमस्थाने याश्च स्त्रियोऽथास्य कर्म रसादानं र
श्मिभिश्च रसाधारणं यच्च किंचित्प्रवह्लितमादित्यकर्मैव तच्चंद्रमसा वायुना सं

नि०उ०

अ१

क्सरेणेतिसंस्तवएतेष्वेवस्थानव्यूहेष्टतुछंदस्तोमपृष्ठस्यभक्तिशेषमनुक
॥५॥ ल्पयीततत्रशरदनुष्टुबेकविंशस्तोमोवैराजंसामेतिपृथिव्यायतनानिहेमंतःपंक्ति
स्त्रिणवस्तोमःशाक्वरंसामेत्यंतरिक्षायतनानिशिशिरोतिछंदास्त्रयस्त्रिंशस्तो
मोरैवतंसामेतिद्युभक्तीनि ॥११॥ मंत्रामननाछंदांसिछादनात्स्तोमस्तवना
द्यजुर्यजतेःसामसंमितमृचास्यतेर्वर्चासममेनेइतिनैदानागायत्रीगायतेः
स्तुतिकर्मणस्त्रिगमनावाविपरीतागायतोमुखादुदपतदितिचब्राह्मणमुष्णि
गुत्स्नाताभवतिस्निह्यतेर्वास्यात्कांतिकर्मणउष्णीषिणीवेत्यौपमिकमुष्णीषं
स्नायतेःककुप्ककुभिनीभवतिककुप्चकुब्जश्चकुजतेर्वोब्जतेर्वाऽनुष्टुबनुस्तो ष्टो
भनागायत्रीमेवत्रिपदांसतींचतुर्थेनपादेनानुस्तोभतीतिचब्राह्मणंबृहतीपरि ॥५॥

ह्रो

ते

त्यचेनान्यथैवंसंस्तूयंतेयथाक्षप्रभृतीन्योषधिपर्यंतानियथोएतत्सौरूपवि
धिकैरंगैःसंस्तूयंतेइत्याख्यानेनेघषेतद्भवत्यपिऋक्दृतिहारतेरासभिरितिया पि
वस्कांतिर्यथाएतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्येतदपितादृशमेवसुखंरथं
युयुजेसिंधुरश्विनमितिनदीस्तुतिर्यथोएतत्पौरुषविधिकैःकर्मभिरित्येतद
पितादृशमेवहोतुश्चिद्धूर्वेहविरद्यमाशततिग्रावस्तुतिरेवापिवाभयविधाः
स्युरपिवापुरुषविधानामेवसतांकर्मात्मानएतेस्युर्यथायज्ञोयजमानस्यएषवा
ख्यानसमयः ॥७॥ तिस्रएवदेवताइत्युक्तंपुरस्तात्तासांभक्तिसाहचर्यंव्या
ख्यास्यामोऽथैतान्यग्निभक्तीन्ययंलोकःप्रातःसवनंवसंतोगायत्रीत्रिवृत्स्तो
मोरथंतरंसामयेचदेवगणाःसमाम्नाताःप्रथमेस्थानेऽग्नायीपृथिवीलेति

बर्हणात्पंक्तिः पंचपदा त्रिष्टुप्प्रस्तोभत्युत्तरपदा कालतुचिता स्यात्लीणीतमं छंद
स्त्रिवृद्वज्रस्तस्य स्तोभमतीतिवा यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुब्भवमिति विज्ञाय
ते॥१२॥ जगतीगततमं छंदो जलचरगतिर्वा जल्गल्यमानोऽसृजदिति च ब्राह्म
णं विराड्विराजमानाद्वा विराधनाद्वा विप्रापणाद्वा विराजनात्संपूर्णाक्षरा वि
राधनान्न्यूनाक्षरा विप्रापणादधिकाक्षरा पिपीलिकमध्येत्यौपमिकं पिपीलि
कापेलतेर्गतिकर्मण इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज ऋग्भाज
श्च भूयिष्ठाः कांश्चिन्निपातभाजोऽथोताभिधानैः संयुज्य हविश्चोदयतींद्रा
य वृत्रघ्न इंद्राय वृत्रतुर इंद्रायांहोमुच इति तान्यप्येके समामनं
ति भूयांसि तु समाम्नानाद्यत्तु संविज्ञानभूतं स्यात्प्राधान्यस्तुति तत्समाम

नऽथोतकर्मभिर्ऋषिर्देवतास्तौतिवृत्रहापुरंदरइति तान्यप्येकेसमामनंतिभू
॥६॥ यांसितुसमाम्नानान्नाहंजनमा…तुतत्तस्याभिधानस्यभवतियथाब्राह्मणा
यबुभुक्षितायौदनंदेहिस्नातायानुलेपनंपिपासतेपानीयमिति॥१३॥अथा
तोनुक्रमिष्यामोऽग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्यामोऽग्निःकस्माद
ग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेऽगंनयतिसंनममानोऽक्नोपनोभवतीतिस्थौ
लाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्योजायतइतिशाकपूणिरि
तादक्ताद्दग्धाद्वानीतात्सखल्वेतेरकारमादत्तेगकारमनक्तेर्वादहतेर्वानीः
परस्तस्यैषाभवति॥१४॥अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं॥होता ॥६॥
रंरत्नधातमं॥अग्निमीळेअग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरो

।।७।। स्यधाराउदकस्यधाराः समिधोनुसंततनसतिरामोंकर्मावानमतिकर्मावा
ताजुषाणोहर्यतिजातवेदाः।हर्यतिप्रेप्साकर्माविहर्यतीति।समुद्रादूर्मिर्म
धुमांउदारदित्यादिसमुक्तंमन्यंतेसमुद्राध्येषोऽद्भ्यउदेतीतिचब्राह्म
णमथापिब्राह्मणंभवत्यग्निःसर्वादेवताइतितस्योत्तराभूयसेनिर्वच
नाय।।१७।।इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्।।एकं
सद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः।।इममेवाग्निंमहांतमा
त्मानमेकमात्मानंबहुधामेधाविनोवदंतींद्रंमित्रंवरुणमग्निंदिव्यंचग
रुत्मंतंदिव्योदिविजोगरुत्मान्गरणवान्गुर्वात्मामहात्मेतिवायस्तकस्त ।।७।।
त्कंप्रजतेयस्मैहविर्निरुप्यतेऽयमेवसोऽग्निर्निपातमेवैतेउत्तरेज्योति

षीएतेननामधेयेनभजेते।।१८।।जातवेदाःकस्माज्जातानिवेदजातानिवैनं
विदुर्जातेजातेविद्यतइतिवाजातवित्तोवाजातधनोजातविद्योवाजातप्र
ज्ञानोयत्तज्जातःपशूनविंदततिजातवेदसोजातवेदस्त्वमितिहिब्रा
ह्मणंतस्मात्सर्वान्तून्पशवोऽग्निमभिसर्पंतीतिचतस्यैषाभवति।।१९।।
प्रनूनंजातवेदसमश्वंहिनोतवाजिनं।।इदंनोबर्हिरासदे।।प्रहिणुतजा
तवेदसंकर्मभिःसमश्नुवानमपिवोपमार्थेस्यादश्वमिवजातवेदसमिति
इदंनोबर्हिरासीदत्विति।तदेतदेकमेवजातवेदसंगायत्रंतृचंदशतयीषुविद्य
तेयत्तुकिंचिदाग्नेयंतज्जातवेदसानांस्थानेयुज्यतेसनमन्येतायमेवाग्निर्जा
तवेदाइत्यप्येतेउत्तरेज्योतिषीजातवेदसीउच्येतेततोनुमध्यमः।।अभिप्रवंत

समनेव योषा। इति तत्पुरस्ताद्व्याख्यातम्। अथ सा वादित्य उदु त्यं जातवेदसमि
॥८॥ ति तदुपरिष्टाद्व्याख्यास्यामो यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते ऽयमेव
सोऽग्निर्जातवेदा निपातमेवैत उत्तरे ज्योतिषी एतेन नामधेयेन भजते ॥२०॥
वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वाऽपि वा विश्वा
नर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्य एषा भवति ॥२१॥
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। इतो जातो विश्वमि
दं विचष्टे वैश्वानरो यतते सूर्येण। इतो जातः सर्वमिदमभिविपश्यति वैश्वा
नरः संयतते सूर्येण राजा यः सर्वेषां भूतानामभिश्रयणीयस्तस्य वयं वैश्वा ॥८॥
नरस्य कल्याण्यां मतौ स्यामेति तत्को वैश्वानरो मध्यम इत्याचार्या वर्षकर्मणा

हितो व्याख्यातो यज्ञस्थ देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति
वा यो देवः सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणी
यानां धनानां दातृतमं तस्यैषापरा भवति ॥१५॥ अग्निः पूर्वेभिर्ऋषिभि
रीड्यो नूतनैरुत॥ स देवाँ एह वक्षति ॥ अग्निर्यः पूर्वैर्ऋषिभिरीलितव्यो
वंदितव्योऽस्माभिश्च नवतरैः स देवानिहावहत्विति स न मन्येतायमेवाग्नि
रित्यप्येते उत्तरे ज्योतिषी अग्नी उच्येते ततोनु मध्यमः ॥१६॥ अभिप्रवंत सम
नेव योषाः कल्याण्यः स्मयमानासो अग्निं। घृतस्य धाराः समिधो नसं
त ता जुषाणो हर्यति जातवेदाः ॥ अभिनवंत समनस इव योषाः समनं सम
ननाद्वा संमाननाद्वा कल्याण्यः स्मयमानासो अग्निमित्यौपमिकं घृत

ह्यनंस्तौति॥२३॥प्रनूमहित्वंवृषभस्यवोचंयंपूरवोवृत्रहणंसचंते॥वैश्वानरो
दस्युमग्निर्जघन्वांअधूनोत्काष्ठाअवशंबरंभेत्॥प्रब्रवीमितन्महत्वंमाहाभा
ग्यंवृषभस्यवर्षितुरपांयंपूरवःपूरयितव्यामनुष्याः।वृत्रहणंमेघहनंसचंते
सेवंतेवर्षकामादस्युर्दस्यतेःक्षयार्थादुपदस्यंत्यस्मिन्रसाउपदासयतिक
र्माणितमग्निर्वैश्वानरोऽघ्नन्नवाधूनोदपःकाष्ठाअभिनच्छंबरंमेघमथा
सावादित्यइतिपूर्वेयाज्ञिकाएषांलोकानांरोहेणसवनानांरोहआम्नातोरोहा
त्प्रत्यवरोहश्चिकीर्षितस्तामनुकृतिंहोताग्निमारुतेशस्त्रेवैश्वानरीयेणसू
क्तेनप्रतिपद्यतेसोऽपिनस्तोत्रियमाद्रियेताग्नेयोहिभवतिततआगच्छतिम
ध्यस्थानादेवतारुद्रंचमरुतश्चततोऽग्निमिहस्थानमत्रैवस्तोत्रियंशंसत्य

उ०नि० अ१

॥९॥ थापिवैश्वानरीयोद्वादशकपालोभवत्येतस्याहिद्वादशविधंकर्मा॥ऽथापिब्रा
ह्मणंभवतीत्यसौवाआदित्योअग्निर्वैश्वानरइत्यथापिनिविसौर्यंवैश्वानरी
भवत्यायोद्यांभात्यापृथिवीमित्येषहिद्यावापृथिव्यावाभासयत्यथापिछं
दोभिकंसूक्तंसौर्यंवैश्वानरंभवत्यादिवस्पृष्ठोअरोचतेत्येषहिदिविपृष्ठो
अरोचतेत्यथापिहविष्पांतीयंसूक्तंसौर्यंवैश्वानरंभवत्ययमेवाग्निर्वैश्वान
रइतिशाकपूणिर्विश्वानरावित्यप्येतेउत्तरेज्योतिषीवैश्वानरोयंयत्ताभ्यांजा
यतेकथंन्वयमेताभ्यांजायतइतियत्रवैद्युतःशरणमभिहंतियावदनुप
त्तोभवतिमध्यमधर्मैववतावद्भवत्युदकेंधनःशरीरोपशमनउपादीयमान ॥९॥
एवायंसंपद्यतउदकोपशमनःशरीरदीप्तिरथादित्यादुदीचिप्रथमेसमावृ

त

तिसा निगदव्याख्याता ॥२३॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्प
॥१०॥ तंति ॥ त आववृत्रन्त्सदनादृतस्यादिद्धृतेन पृथिवी व्युद्यते ॥ कृष्णं निरयणं रा॥
रादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयस्ते यदाऽमुतोऽर्वाचः पर्याव
र्त्तंते सहस्थानादुदकस्यादित्यादथ घृतेनोदकेन पृथिवी व्युद्यते घृतमित्यु
दकनामजिघर्तेः सिंचतिकर्मणोऽथापि ब्राह्मणं भवत्यग्निर्वा इतो वृष्टिं समी
रयति धामच्छद्दिवः खलु वै एतत्वा वर्षति मरुतः सृष्टां वृष्टिं नयंति । यदा खलु वा
असावादित्योन्यङ् रश्मिभिः पर्यावर्त्ततेऽथ वर्षतीति यथो एतद्द्राहस्त्यवरो
हव्विकीर्षितद्व्याम्नायवचनादेतद्भवति यथो एतद्वैश्वानरीयो द्वादशकपा ॥१०॥
लो भवतीत्यनिर्वचनं कपालानि भवंत्यस्ति हि सौर्य एककपालः पंचकपाल

श्च यथो एतद्ब्राह्मणं भवतीति बहुभक्तिवादीनि हि ब्राह्मणानि भवंति पृथिवी
वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वानर इति यथो एतन्निवत्सौर्य वैश्वा
नरी भवतीत्यस्यैव सा भवति यो वि[illegible]ो मानुषीभ्यो दीदिदित्येष हि विड्भ्यो मानु
भि षीभ्यो दीप्यते यथो एतच्छांदोमिकं सूक्तं सौर्य वैश्वानरं भवतीत्यस्यैव तद्भव
ति जमदग्निराहुत इति । जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा
तैरभिहुतो भवति यथो एतद्धविष्पांतीयं सूक्तं सौर्य वैश्वानरं भवतीत्यस्यैव
तद्भवति ॥२४॥ हविष्पांतमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ॥ तस्य भ
र्मणो भुवनाय देवा धर्मणे कं स्वधया पप्रथंत ॥ हविर्यत्पानीयमजरं सूर्यविदि
दिविस्पृश्यऽभिहुतं जुष्टमग्नौ तस्य भरणाय च भावनाय च धारणाय च तेभ्यः

सर्वेभ्यः कर्मभ्यो देवा इममग्निमन्वेना । प्रथन्ताऽथाप्याह ॥२५॥ अपामुपस्थेम
॥११॥ हिषा अगृभ्णत विशो राजानमुपतस्थुर्ऋग्मियं ॥ आ दूतो अग्निमभरद्विवस्वतो
वैश्वानरं मातरिश्वा परावतः ॥ अपामुपस्थ उपस्था नेमहत्यंतरिक्षलोके म
त सीनामहांत इति वा गृह्णीत माध्यमका देवगणा विश इव राजानमुपतस्थुर्ऋ
ग्मियमृग्मंतमिति वाऽर्चनीयमिति वा पूजनीयमिति वाऽहरद्यं दूतो देवानां
विवस्वत आदित्याद्विवस्वान्विवासनवान्प्रेरितवतः परागताद्वाऽपि वास्या
ग्नेर्वैश्वानरस्य मातरिश्वानमाहर्त्तारमाह मातरिश्वा वायुर्मातर्यंतरिक्षे श्व
सिति मातर्याश्वसितीति वाऽथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादस्तौ ॥११॥
ति ॥२६॥ मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ॥ मा

पाप्याह वैश्वानरायतने सूर्ये येति न च पुनरात्मनात्मानं संपतते ×२

तस्यादित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयमसंस्पर्शयन्धा
रयति तत्प्रदीप्यते सोऽयमेव संपद्यतेऽन्येनैवान्यः संयतत इत्यतस्तदिममादधात्यमु
तोऽमुष्य रश्मयः प्रादुर्भवंतीतोऽस्यार्चिषस्तयोर्भासोः संसंगं दृष्ट्वैवमवक्ष्यद
थ यान्येतान्यौत्तमिकानि सूक्तानि भागानि वा सावित्राणि वा सौर्याणि वा पौ
ष्णानि वा वैष्णवानि वा वैश्वदेव्यानि वा तेषु वैश्वानरीयाः प्रवादा अभविष्यन्ना
दित्यकर्मणा चैनमस्तोष्यन्निति उदेषीत्यस्तमेषीति विपर्येषीत्याग्नेयेष्वेव हि
सूक्तेषु वैश्वानरीयाः प्रवादा भवंत्यग्निकर्मणा चैनं स्तौतीति वहसीति पच
सीति दहसीति यथो एतद्वर्षकर्मणा चैनं स्तौतीत्यस्मिन्नप्येतदुपपद्यते । सम
नमेतदुदकमुच्चैत्यव चाहभिः ॥ भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय ॥ इ

यामूतुयज्ञियानामेतामपोयत्तूर्णिश्चरतिप्रजानन् ॥ मूर्धामूर्त्तमस्मिन्नधी
यतेमूर्धायः सर्वेषांभूतानांभवति । नक्तमग्निस्ततः सूर्योजायतेप्रातरुद्य
न् । सएषप्रज्ञांत्वेतांमन्यते । यज्ञियानांदेवानांयज्ञसंपादनामपोयत्कर्मचर
तिप्राजानंत्सर्वाणिस्थानान्यनुसंचरतित्वरमाणस्तस्योत्तराभूयसेनिर्व
चनाय ॥९॥ स्तोमेनहिदिविदेवासोअग्निमजीजनंछक्तिभीरोदसिप्रां ॥
तमूअकृण्वंत्रेधाभुवेकंसओषधीः पचतिविश्वरूपाः ॥ स्तोमेनयंहिदिवि
देवासोअग्निमजनयंछक्तिभिः कर्मभिर्द्यावापृथिव्योरापूरणंतमकुर्वंत्रे
धाभवायपृथिव्यामंतरिक्षेदिवीतिशाकपूणिर्यदस्यदिवितृतीयंतदसाव
दित्यइतिहिब्राह्मणंतदग्नीकृत्यस्तौत्यथैनमेतयादित्तीकृत्यस्तौति ॥१०॥

उ० नि० श्री

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयं ॥ यदा चरिष्णू मिथुनावभू
॥१२॥ तामादित्प्रापश्यन्भुवनानि विश्वा ॥ यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सू
र्यमादितेयमदितेः पुत्रं । यदा चरिष्णू मिथुनौ प्रादुरभूतां ॥ सर्वदा सहचारि
णौ उषाश्चादित्यश्च मिथुनौ कस्मान्मिथुनौ मिनोतिः श्रयतिकर्मा थु इति नामक
रणस्थकारो वा नयतिः परो वा निर्वासमाश्रितावन्योऽन्यं नयतो वनुतो वा मनु
ष्यमिथुनावप्येतस्मादेव मेथन्तावन्योऽन्यं वनुत इति वाऽथैनमेतयाग्नीहो
यस्तौति ॥ २१ ॥ यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ॥ आशेकु
रित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥ यत्र विवदेते दैव्यौ होतारौ ॥१२॥
अयं चाग्निरसौ च मध्यमः कतरो नौ यज्ञे भूयो वेदेत्याशक्नुवन्ति तत्सहमदन

निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते भजेते ॥३१॥ अथ यस्मै रक्षो
॥१३॥ अथातो दैवतमिंद्रात् दिवः परोक्षकृतास्तुधेति स्रोऽथाकारचिंतनमपुरुषविधं
तिस्र एव देवता इत्युक्तं पुरस्तात् व्यधितानि द्रव्यभक्तीन्यथैतान्यादित्यभक्तीनि मंत्रा
मननाज्जगती गततममथातोऽनुक्रमिष्यामोऽग्निमीळेऽग्निः पूर्वेभिरृषि
प्रवं तेद्रीभित्रं जातवेदाः कस्माज्जातं नं जातवेदसं वैश्वानरः कस्माद्वैश्वानर
स्य अन्नं महिलं वहलघ्नं नियानं ह्वाविषां तमपामुपस्थे मध्यम ध्रुवः स्तोमेन हि यद
दिनं यत्रावदेते यावन्मात्रमेकं विंशति ॥ ॥३१॥ ॥इति निरुक्ते सप्तमोध्यायः॥
॥ ॥हरिः हि ॐ ॥ ॥द्रविणोदाः कस्माद्धनं द्रविणमुच्यते यदेनमभिद्रवंति ॥१३॥
बलं वा द्रविणं यदेनेनाभिद्रवंति तस्य दाता द्रविणोदास्तस्यैषा भवति ॥१॥

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे । यज्ञेषु देवमीळते । द्रविणोदाय स्वं
द्रविणस इति द्रविणसादन इति वा द्रविणसानिन इति वा द्रविणसस्तस्मा
त्पिबत्विति वा । यज्ञेषु देवमीळते । याचंति स्तुवंति वर्धयंति पूजयंतीति वा तत्को
द्रविणोदा इंद्र इति क्रौष्टुकिः स बलधनयोर्दातृतमस्तस्य च सर्वा बलकृतिरो
जसो जातमुत मन्य एनमिति चाहाथाप्यग्निं द्रविणोदसमाहैष पुनरेतस्मा
ज्जायते । यो अश्मनोरंतरग्निं जजानेत्यपि निगमो भवत्यथाप्यृतुयाजेषु द्रावि
णोदसाः प्रवादा भवंति तेषां पुनः पात्रस्यैंद्रपानमिति भवत्यथाप्येनं सोमपा
नेन स्तौत्यथाप्याह । द्रविणोदाः पिबतु द्राविणोदस इत्ययमेवाग्निर्द्रविणोदा
इति शाकपूणिराग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवंति । देवा अग्निं

धारयंद्राविणोदाइत्यपिनिगमोभवति।यथोएतत्सबलधनयोर्दातृतमहृति
॥१४॥ सर्वास्तुदेवतास्वैश्वर्यंविद्यतेयथोएतदोजसोजातमुतमन्यएनमितिचाहेत्यथ
मग्निरोजसाबलेनमथ्यमानोजायतेतस्मादेनमाहसहसस्पुत्रंसहसःसूनुं
सहसोयहुंयथोयदग्निंद्राविणोदसमाहेत्यृत्विजोऽत्रद्रविणोदसउच्यंतेहवि
षोदातारस्तेचैनंजनयंति।ऋषीणांपुत्रोअधिराजएषइत्यपिनिगमोभवति
यथोयत्तेषांपुनःपुत्रस्येंद्रपानमितिभवतीतिभक्तिमात्रंतद्भवतियथावा
यव्यानीतिसर्वेषांसोमपात्राणांयथोएतत्सोमपानेनैनंस्तौतीत्यस्मिन्नप्येतदु
पपद्यते।सोमंपिबमंदसानोगणश्रिभिरित्यपिनिगमोभवति।यथोएतद्द्रवि ॥१४॥
णोदाःपिबतुद्राविणोदसइत्यस्यैवतद्भवति॥२॥मेद्यंतुतेवह्नयोयेभिरीयसे

समानाख्यानामृत्विजस्तेषांयज्ञंसमश्नुवानानांकोनइदंविवक्ष्यतीतितस्यो
त्तराभूयसेनिर्वचनाय॥२०॥यावन्मात्रमुषसोनप्रतीकंसुपर्ण्योऽवसतेमा
तरिश्वः॥तावद्दधात्युपयज्ञमायन्ब्राह्मणोहोतुरवरोनिषीदन्॥यावन्मात्रमु
षसःप्रत्यक्तंभवतिप्रतिदर्शनमितिवाऽभ्युपमानस्यसंप्रत्ययेप्रयोगइहेव
निधेहीति।यथासुपर्ण्यःसुपतनाएतारात्र्योवसतेमातरिश्वञ्ज्योतिर्वर्णस्य
तावदुपदधातियज्ञमागच्छन्ब्राह्मणोहोतास्याग्नेर्होतुरवरोनिषीदन्।हो
८ तृजपस्त्वयमग्निर्वैश्वानरीयोभवति।देवसवितरेतंत्वावृणतेऽग्निंहोत्राय
सहपित्रावैश्वानरेणेतीममेवाग्निंसवितारमाहसर्वस्यप्रसवितारंमध्यमं
वोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरूप्यतेऽयमेवसोऽग्निर्वैश्वानरः

शिषण्यन्वीळुयस्वावनस्पते॥आपूर्याधिष्ण्ये।अभिगूर्यात्वंनेष्ट्रात्सोमंद्रविणोदः
पिबऋतुभिः॥मेद्यंतुतेवह्नयोयेवोढारोयैर्यास्यरिष्यन्दृढीभवाऽऽपूर्याधिष्ण्ये।
अभिगूर्यात्वंनेष्ट्रीयाद्धिष्ण्याद्धिष्ण्यो।धिषण्यो।धिषणाभवो।धिषणावा
क्।धिषेर्दधात्यर्थेधीसादिनीवाधीसानिनीवा।वनस्पतइत्येनमाहैषहिवनानां
पातावापालयितावावनंवनोतेः।पिबऋतुभिःकालैः॥३॥अथातआप्रियआप्रि
यः।कस्मादाप्नोतेःप्रीणातेर्वाऽऽप्रीभिराप्रीणातीतिचब्राह्मणंतासामिध्मः
प्रथमागामीभवतीध्मःसमिंधनात्तस्यैषाभवति॥४॥समिद्धोअद्यमनुषोदु
रोणेदेवोदेवान्यजसिजातवेदः॥आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविर
सिप्रचेताः॥समिद्धोअद्यमनुष्यस्यमनुष्यस्यगृहे।देवोदेवान्यजसिजात

वेद्आवहन्व मित्रमहश्चिकित्वांश्चेतनावान्त्वं दूतः कविरसि प्रचेताः।प्रवृद्धश्चे
॥१५॥ तायज्ञेध्मइति॥काथक्योऽग्निरितिशाकपूणिस्तनूनपादाज्यंभवतिनपादि
त्यननंतरायाःप्रजायानामधेयंनिर्णततमाभवतिगोरत्रतनूरुच्यतेतताअ
स्यांभोगास्तस्याःपयोजायतेपयसआज्यंजायतेऽग्निरितिशाकपूणिरापोऽ
त्रतन्वउच्यंते।ततांऽतरिक्षेताभ्यओषधिवनस्पतयोजायंतेओषधिवन
स्पतिभ्यएषजायतेतस्यैषाभवति॥५॥तनूनपात्पथऋतस्ययानान्मध्वा
समंजंत्स्वदयासुजिह्व॥मन्मानिधीभिरुतयज्ञमृंधंदेवत्राचकृणुह्यध्वरं
नः॥तनूनपात्पथऋतस्ययानान्यज्ञस्ययानान्मधुनासमंजंत्स्वदयकल्या ॥१५॥
णजिह्वमननानिचनोधीभिर्यज्ञंचसमर्धयदेवान्नोयज्ञंगमयनराशंसोयज्ञ

सएनांन्यक्षीषितोयजीयान्॥इषितःप्रेषितइतिवाऽधीष्टइतिवायजीयान्य
॥१६॥ ष्टृतरोबर्हिःपरिबर्हणात्तस्यैषाभवति॥८॥प्राचीनंबर्हिःप्रदिशापृथिव्याव
स्तोरस्यावृज्यतेअग्रेअह्नां॥व्युप्रथतेवितरंवरीयोदेवेभ्योअदितयेस्योनं॥
प्राचीनंबर्हिःप्रदिशापृथिव्याः॥वसनायास्याःप्रवृज्यतेऽग्रेह्नांबर्हिःपूर्वा
की ह्णेतद्विप्रथतेवितरंविकीर्णतरमितिवाविस्तीर्णतरमितिवावरीयोवरतर
मुरुतरंवादेवेभ्यश्चादितयेचस्योनंस्योनमितिसुखनामस्यतेरवस्यंत्ये
तत्सेवितव्यंभवतीतिवाद्वारोजवतेर्वाद्रवतेर्वावारयतेर्वातासामेषाभवति॥९॥
व्यचस्वतीरुर्वियाविश्रयंतांपतिभ्योनजनयःशुंभमानाः॥देवीर्द्वारोबृहती ॥१६॥
र्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः॥व्यचनवत्यउरुत्वेनविश्रयंतांपतिभ्य

इवजायाऊरूमैथुनेधर्मेशिश्राणाःशोभमानांवरतममंगमूरूदेव्योद्वारोबृहत्योम
हत्योविश्वमिन्वाविश्वमभिरेतियज्ञेगृहद्वारइतिकाथक्योऽग्निरितिशाक
पूणिरुषासानक्तोषाश्चनक्ताचोषाव्याख्यातानक्तेतिरात्रिनामानक्तिभूतान्य
वश्यायेनापिवानक्ताव्यक्तवर्णातयोरेषाभवति॥१०॥आसुष्वयंतीयजतेउपा
केउषासानक्तासदतांनियोनौ॥दिव्येयोषणेबृहतीसुरुक्मेअधिश्रियंशु
क्रपिशंदधाने॥सुष्वापयमाणेइतिवासुष्वापयन्त्याविितिवासीदतामितिवाआ
सीदतामितिवायज्ञियेउपक्रान्तेदिव्येयोषणेबृहत्योमहत्योसुरुक्मेसुरो
चनेअधिदधानेशुक्रपेशसंश्रियंशुक्रंशोचतेर्ज्वलतिकर्मणःपेशइतिरूप
नामपिंशतेर्विपिंशितंभवतिदैव्याहोतारादैव्योहोतारावयंचाग्निरसौचम

उ०नि०

ध्यमस्त्वपोरेषा भवति ॥ ११ ॥ दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो
॥१७॥ यजध्यै ॥ प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ दैव्यौ होतारौ
प्रथमौ सुवाचौ निर्मिमानौ यज्ञं मनुष्यस्य मनुष्यस्य यजनाय प्रचोदयमानौ
यज्ञेषु कर्तारौ पूर्वस्यां दिशि यष्टव्यमिति प्रदिशन्तौ तिस्रो देवीः तिस्रो देव्य
स्तासामेषा भवति ॥ १२ ॥ आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती
॥ तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥ एतु नो यज्ञं भारती क्षि
प्रं भरत आदित्यस्तस्य भा इडा च मनुष्यवदिह चेतयमाना तिस्रो देव्यो बर्हिरि
दं सुखं सरस्वती च सुकर्माण आसीदन्तु ॥ त्वष्टा तूर्णमश्नुत इति नैरुक्ताः त्वि ॥१७॥
षेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणस्तस्यैषा भवति ॥ १३ ॥

ति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति
तस्यैषा भवति ॥ ६ ॥ नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ॥ ये
सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ नराशंसस्य महिमा
नमेषामुपस्तुमो यज्ञियस्य यज्ञैर्ये सुकर्माणः शुचयो धियं धारयितारः स्वद
यन्तु देवा उभयानि हवींषि सोमं चेतराणि चेति वा तान्त्राणि चावापिकानि चेति वा
ळ ईट्टेः स्तुतिकर्मण इन्धतेर्वा तस्यैषा भवति ॥ ७ ॥ आजुह्वान ईड्यो वन्द्य
श्चायाह्यग्ने वसुभिः सजोषाः ॥ त्वं देवानामसि यह्व होता स एनान्यक्षीषि
तो यजीयान् ॥ आहूयमान ईळितव्यो वन्दितव्यश्चायाह्यग्ने वसुभिः सजोषणः
त्वं देवानामसि यह्व होता ॥ यह्व इति महतो नामधेयं यातश्च हूतश्च भवति ॥

यइमेद्यावापृथिवी जनित्रीरूपैरपिंशद्भुवनानि विश्वा॥ तमद्यहोतरिषितोय
जीयांदेवंत्वष्टारमिहयक्षिविद्वान्॥ यइमेद्यावापृथिव्यौजनयित्र्यौरूपैर
करोद्भूतानिचसर्वाणि। तमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयक्षिवि
द्वान्माध्यमिकस्त्वष्टेत्याहुर्मध्यमेचस्थानेसमाम्नातोऽग्निरितिशाकपू
णिस्तस्यैषापराभवति॥ १४॥ आविष्ट्योवर्धतेचारुरासुजिह्मानामूर्ध्वःस्वयशा
उपस्थे। उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥ आविरावेद
नात्त्स्योवर्धतेचारुरासुचारुचरतेजिह्मंजिहीतेरूर्ध्वउच्छ्रितोभवतिस्वय
शाआत्मयशाउपस्थउपस्थान। उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहं
प्रतिजोषयेते। द्यावापृथिव्यावितिवाऽहोरात्रेइतिवाऽरणीयइतिवाप्रत्यै…

सिंहसहनंप्रत्यासेवेते॥१५॥वनस्पतिर्व्याख्यातस्तस्यैषाभवति॥१६॥उपाव
॥१८॥ सृजत्मन्यासमंजंदेवानांपाथऋतुथाहवींषि॥वनस्पतिःशमितादेवोअ
ग्निःस्वदंतुहव्यंमधुनाघृतेन॥उपावसृजत्मनात्मानंसमंजन्देवानामृ
त्मतावृतौहवींषिकालेकाले॥वनस्पतिःशमितादेवोअग्निरित्येतेत्रयःस्वद
यंतुहव्यंमधुनाचघृतेनचतत्कोवनस्पतिर्यूपइतिकात्थक्योऽग्निरितिशा
कपूणिस्तस्यैषापराभवति॥१७॥अंजंतित्वामध्वरेदेवयंतोवनस्पतेमधु
नादैव्येन॥यदूर्ध्वस्तिष्ठाद्रविणेहधत्तायद्वाक्षयोमातुरस्याउपस्थे॥
अंजंतित्वामध्वरेदेवान्कामयमानावनस्पतेमधुनादैव्येनचघृतेनचय ॥१८॥
दूर्ध्वःस्थास्यसिद्रविणानिचनोदास्यसियद्वातेकृतःक्षयामातुरस्याउप

नुयाजा

उ०नि० हीतवा स्वा वागाहेतिवा स्वं प्राहेतिवा स्वाहुतं हविर्जुहोतीतिवा तासामेषा भव
॥१९॥ ति ॥२०॥ सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अस्य होतुः
प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदंतु देवाः ॥ सद्यो जायमानो निरमिमीत
यज्ञमग्निर्देवानामभवत्पुरोगाश्च अस्य होतुः प्रदिश्यृतस्य वाच्यास्ये स्वाहा
कृतं हविरदंतु देवा इति यजं ती ति आप्रीदेवता अनुक्रांता अथ किं देवताः
प्रयाजा आग्नेया इत्येके ॥२१॥ प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतं ह
मा विषो दत्त भागं ॥ घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥
तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वंतो हविषः संतु भागाः ॥ तवाग्ने य ॥१९॥
ज्ञोऽयमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः ॥ आग्नेया वै प्रयाजा आग्ने

जो: या अनुयाजा इति च ब्राह्मणं छंदोदेवता इत्यपरं छंदांसि वै प्रयाजाश्छंदां
स्यनुयाजा इति च ब्राह्मणमृतुदेवता इत्यपरमृतवो वै प्रयाजा ऋतवोऽनुयाजा
इति च ब्राह्मणं पशुदेवता इत्यपरं पशवो वै प्रयाजाः पशवोऽनुयाजा इति च ब्राह्म
णं प्राणदेवता इत्यपरं प्राणा वै प्रयाजाः प्राणा वा अनुयाजा इति च ब्राह्मणमा
त्मदेवता इत्यपरमात्मा वै प्रयाजा आत्मा वा अनुयाजा इति च ब्राह्मणमाग्नेया
इति तु स्थितिर्भक्तिमात्रमितरत् किमर्थं पुनरिदमुच्यते यस्यै देवतायै हविर्गृ
मनसा हीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति ह ज्ञायते तान्येतान्येकादशाप्रीसूक्ता
नि तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गार्त्समदमिति नाराशंसवंति मैधातिथं दैर्घत
मसं प्रैषिकमित्युभयवंत्यतोऽन्यानि तनूनपात्वंति तनूनपात्वंति ॥२२॥ ॥

॥ ॥अथभेरवह्ले॥ ॥द्रविणोदाः कस्माद्द्रविणोदाद्रविणसोमेद्धंतुलेस्यात्मप्रियःस
२० मिघोअद्यतनूनपान्नराशंस्यजुह्वानंप्राचीनंध्वबस्वतीरासुष्वयंतेदिव्याहोता
रानोयज्ञेयइमेभाविष्ठ्योवानस्पतिरूपावस्तजांजेतिदेवेभ्योवनस्पतेरत्नानंय
सद्योजातःप्रयजाम्नेह्वाविरातिः॥ ॥२२॥ ॥इतिनिरुक्तेअष्टमोध्यायः॥ ॥हरिः
ओम्॥ ॥अथयानिपृथिव्यायतनानिसत्वानिस्तुतिंलभंतेतान्यतोनुक्रमिष्या
मस्तेषामश्वःप्रथमागामीभवत्यश्वोव्याख्यातस्तस्यैषाभवति॥ ॥१॥अश्वोवो
ह्लासुरवंरथंहसनामुपमंत्रिणः॥रोपोरोमण्वतोसेदेवारिम्मइंकइछ्नंतींद्रायेदोशपा २०
रित्व॥अश्वोवोह्लासुरवंवोह्लासुरवमितिकल्याणनामकण्याणंपुण्यंसुहितंभ
वतिसुहितंगम्यतीतिवा॥हसेतावापातावापालयितावारोपमद्धातीतिवाविवार

स्फुउपस्छानेग्निरितिशाकपूणिस्तस्यैषापराभवति॥१८॥देवेभ्योवनस्पतेहवं
षिहिरण्यपर्णप्रदिवस्तेअर्थं॥प्रदक्षिणिद्रशनयानियम्यच्चतस्यरश्मिपृथि
वीरजिष्ठैः॥देवेभ्योवनस्यतेहवींषिहिरण्यपर्णहृतपर्णऽपिवोपमार्थस्या २८
द्धिरण्यवर्णपर्णेतिप्रादिवस्तेअर्थपुराणःस्तसोऽर्थोऽयंतुप्रज्ञमोयज्ञस्यव
हपथिपीराजिधेरेनुतमेरजन्धलतमेस्तघ्नतमेःप्रतिष्ठितमीरितिवातस्यै
षापराभवति॥१९॥वनस्यतेरशनयानियूयदेपिष्टतमयावयुनानिविद्वा भिधा
न्॥वहदेवत्रादिधिषोहवींषिप्रवदातारमम्रतेषुवोचः॥वनस्यतेरशनया
भिधा नियूयापिष्ठतमयावयुनानिविद्वान्॥प्रज्ञानानिप्रजानन्वहदेवाव्यज्ञे
दातुहवींषिप्रज्ञाहिचदातारममृतेषुदेवेषुस्वाहाकृतयःस्वाहेत्येतत्सुआ

यतिमानोख्याख्यातस्तस्यैषाभवति॥२॥मानोमित्रोवरुणोअर्यमायुरिंद्रऋभुक्षा
मरुतःपरिख्यंन्॥यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्याणि॥यद्वाजि
नोदेवैर्जातस्यसप्तेःसरणस्यप्रवक्ष्यामोयज्ञेविदथेवीर्याणिमानस्त्वंमित्रश्चवरु
य पाश्चार्यमाचायुश्चवायुरयनइंद्रश्चोरुक्षयणऋभूणांराजेतिवामरुश्चपरिख्यं
छन्कुःनिःशक्रोमुक्तेनुमात्मानंशक्रोतिनदिशुमितिवासर्वतःशंकुरोह्ग्वितिवाशं
क्रोनेवतिस्यैषाभवति॥ ॥२॥कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवना
वं॥सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिमाविश्व्याविदत्॥न्यक्रंदीज्जन्मप्र
ब्रुवाणोयथास्यशब्दस्तथानामेतयतिवाचमीरयितेवनावंसुमंगलश्चशकुनेभ
वकल्याणमंगलोमंगलंगिरतेर्गृणात्यर्थेगिरत्यनर्थानितिवांगलमंगलवेभज

।।२९।। यतिपापकमिन्तिनैरुक्तामागच्छन्त्विति वा। मावत्वाकोविद्विभ्रतिःसर्वतोविदकृत्सम
दमर्थमस्युथितंकपिंजलोभिवर्वाशेनदक्षिवादिन्येषकर्भवति।।४।।भद्रंवददक्षिणतो
भद्रमुत्तरतोवद।भद्रंपुरस्तान्नोवदभद्रंपश्चात्कपिंजलाइतिसानिगदव्याख्याता।
गृत्समदोगृत्समदनोगृत्सइतिमेधाविनामगृणातेस्तुतिकर्मणोमंडूकामज्जूकाम
ज्जनान्मदतेर्वामोदतिकर्मणोमंदतेर्वातृप्तिकर्मणोमंडयतेरितिवैय्याकरणाएषा मंड
मोकइतिवामंडमेषामोकइतिवामंडमदेर्वामुदेर्वातेषामेषाभवति।।५।।संवत्सरंशशयानाब्राह्मणा
व्रतचारिणः।वाचंपर्जन्यजिन्वितांप्रमंडूकाअवादिषुः।।संवत्सरंशिश्रयानाब्राह्मणा ।।२९।।
व्रतचारिणोब्रुवाणाअपिवापमार्थस्याद्ब्राह्मणाइवव्रतचारिणइतिवावाचंपर्जन्यप्रीतां
प्रावादिषुर्मंडूकावसिष्ठोवर्षकामःपर्जन्यंतुष्टावतंमंडूकाअन्वमोदंतसमंडूकान

उ०नि०

॥२२॥

त्येनाथ्रप्रथमया निंदस्तुत्तरमाभिर्ऋषेरस्तपरिद्यूनस्येतदार्षं वेदयंते। ग्रावाणो हंते
र्वा गृणातेर्वा गृह्णातेर्वा तेषामेषा भवति॥८॥ प्रैते वदंतु प्र वयं वदाम ग्रावभ्यो वा
चं वदता वदद्भ्यः॥ यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेंद्राय सोमिनः॥
प्रवदंत्वेते प्रवदाम वयं। ग्रावभ्यो वाचं वदत वदद्भ्यो यदद्रयः पर्वता आदरणीयाः
सह सोममाशवः क्षिप्रकारिणः श्लोकः शृणोतेर्घोषो घुष्यतेः सोमिनो यूयं स्थेति
वा सोमिनो गृह इति वा। येन नराः प्रशस्यंते स नाराशंसो मंत्रस्तस्यैषा भवति॥
॥९॥ अमंदान्स्तोमान्प्रभरे मनीषा सिंधावधिक्षियतो भाव्यस्य। यो मे सहस्रम
मिमीत सवानतूर्तो राजा श्रव इच्छमानः। अमंदान्स्तोमानबालिशाननल्पान्वा बा ॥२२॥
लो बलवर्ती भर्तव्यो भवत्यंबास्मा अलं भवतीति वा अस्मै बलं भवतीति वा बलो वा

प्रतिषेधव्यवहितः प्रभरे मनीषया मनस ईषया स्तुत्या प्रज्ञया वा सिंधावधिनिव
सतो भावयव्यस्य राज्ञो यो मे सहस्रं निरमिमीत सवानतूर्तो राजा तूर्ण इति वा
त्वरमाण इति वा प्रशंसामिच्छमानः॥१०॥ यज्ञसंयोगाद्राजा स्तुतिं लभेत रा
जसंयोगाद्युद्धोपकरणानि तेषां रथः प्रथमागामी भवति रथो रंहतेर्गतिक
र्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोस्मिंस्तिष्ठतीति वा रपतेर्वा रसते
र्वा तस्यैषा भवति॥११॥ वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवी
रः। गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि। वनस्पते हि
दृढांगो हि भवास्माकं सखा प्रतरणः सुवीरः कल्याणवीरो गोभिः संनद्धोसि
वीळयस्वेति संस्तंभस्वास्थाता ते जयतु जेत्वानि। इंदुभिरिति शब्दानुकर

उ०नि०

॥२३॥

तांद्रुमोभिन्नइतिवादुंदुभ्यतेर्वास्याच्छब्दकर्मणस्तस्यैषाभवति॥१२॥उपश्वास
यपृथिवीमुतद्यांपुरुत्रातेमनुतांविष्ठितंजगत्॥सदुंदुभेसजूरिंद्रेणदे
वैर्दूराद्दवीयोअपसेधशत्रून्॥उपश्वासयपृथिवींचादिवंचबहुधाते
घोषंमन्यतांविष्ठितंस्थावरंजंगमंचयत्सदुंदुभेसहजोषणइंद्रेणचदेवै
श्चदूराद्दूरतरमपसेधशत्रून्॥इषुधिरिषूणांनिधानंतस्यैषाभवति॥१३॥
बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य॥इषुधिःसंकाःपृ
तनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥बह्वीनांपिताबहुरस्यपुत्रइतीषू
नभिप्रेत्यप्रस्मयतइतिवापद्यमानःशब्दानुकरणंवासंकाःसंवृतःसंघर्व ॥२३॥
स्यवाकिरेत्तेःपृष्ठेनिनद्धोजयतिप्रसूतइतिव्याख्यातंहस्तघ्नोहस्तेहन्य

तुमोदमानान्दृष्ट्वातुष्टावतदभिवादिन्येषाभवति॥६॥उपप्लवदमंडूकिवर्षमावद
तादुरि॥मध्येहृदस्यप्लवस्वविगृह्यचतुरःपदः॥इतिसानिगदव्याख्याताऽक्षा
अश्नुवतएनानितिवाऽभ्यश्नुवतएभिरितिवातेषामेषाभवति॥७॥प्रावेपामा
बृहतोमादयंतिप्रवातेजाइरिणेवर्वृताना॥सोमस्येवमौजवतस्यभक्षोविभी
दकोजागृविर्मह्यमच्छान्॥प्रवेपिणोमामहतोविभीदकस्यफलानिमादयंति
प्रवातेजाःप्रवणेजाइरिणेवर्तमानाइरिणंनिर्ऋणमृणातेरपार्णंभवत्यपरता
अस्मादोषधयइतिवा॥सोमस्येवमौजवतस्यभक्षःमौजवतोमूजवतिजातो
मूजवान्पर्वतोमुंजवान्मुंजोविमुच्यतेइषीकयेषीकेषतेर्गतिकर्मणइयमपी
तरेषीकेतस्मादेवविभीदकोविभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत्प्रशंस

तेतस्यैषाभवति॥ ॥१४॥अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नो
विश्वावयुनानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः॥अहिरिवभोगैःपरिवेष्टयतिबा
हुंज्यायावधात्परित्रायमाणोहस्तघ्नःसर्वाणिप्रज्ञानानिप्रजानन्पुमान्पुरुमनाभ
वतिपुंसतेर्वाभीशवोव्याख्यातास्तेषामेषाभवति॥ ॥१५॥रथेतिष्ठन्नयतिवाजि
नःपुरोयत्रयत्रकामयतेसुषारथिः॥अभीशूनांमहिमानंपनायतमनःपश्चादनु
यच्छंतिरश्मयः॥रथेतिष्ठन्नयतिवाजिनःपुरःपुरस्तात्संतोयत्रयत्रकामयतेसुषा
रथिःकल्याणसारथिरभीशूनांमहिमानंपूजयामिमनःपश्चात्संतोनुयच्छंतिरश्म
योधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवाधन्वंत्यस्मादिषवस्तस्यैषाभवति॥१६॥
धन्वनागाधन्वनाजिंजयेमधन्वनातीव्राःसमदोजयेम॥धनुःशत्रोरपकामंकृणोति

२४ धन्वनासर्वाःप्रदिशोजयेम॥इतिसानिगदव्याख्याता॥समदःसमदोवातेःसमदो
वामदतेर्ज्यजयतेर्वाजिनातेर्वाप्रजावयतीषूनितिवानस्याएषाभवति॥१७॥वक्ष्यंती
वेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना॥योषेवशिंक्तेविततानधिधन्वंज्या
इयंसमनेपारयंती॥वक्ष्यंतीवागच्छतिकर्णंप्रियमिवसखायमिषुंपरिषस्वजमाना
योषेवशिंक्तेशब्दंकरोतिविततानधिधनुषिज्येयंसमनेसंग्रामेपारयंती॥इषुरिषतेर्गति
कर्मणोवातस्यैषाभवति॥१८॥सुपर्णंवस्तेमृगोअस्यादंतोगोभिःसंनद्धापततिप्र
सूता॥यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंसन्॥सुपर्णंवस्तइतिवा
जानक्षिप्रेत्यमृगमयोस्यादंतोमृगयतेर्वागोभिःसंनद्धापततिप्रसूतेतिव्याख्याते २४
यत्रनराःसंद्रवंतिच॥तत्रास्मभ्यमिषवःशर्मयच्छंतुशरणंसंग्रामेषु॥अश्वाजनीकशेत्याहुः

द्रुघणमुपयंतएनमितिव्याख्यातामेहयन्वृषभंमध्यआजेरजयनस्यंजवनस्येतिवा
२५ तेनतंसम्भवंराजानंभवतिस्मनिकर्मतद्देसुभवंशतवत्सहस्रंगवांमुद्गलःप्रधनेजिगा
यप्रधनइतिसंग्रामनामप्रकीर्णान्यस्मिन्धनानिभवंतिद्रुघणोद्रुममयोघन
स्तत्रेतिहासमाचक्षतेमुद्गलोभार्म्यश्वऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्यव
हृत्याजिंजिगायतदृषिवादिन्येषाभवति॥२०॥इमंतंपश्यवृषभस्ययुंजंकाष्ठायाः
मध्येद्रुघणंशयानं॥येनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषु॥इमं
तंपश्यवृषभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं॥येनजिगायशतवत्सहस्रं २५
गवांमुद्गलःपृतनाज्येषु॥पृतनाज्यमितिसंग्रामनामपृतनानामजनाद्वाजयनाद्वा
द्वामुद्गलोमुद्गलवान्मुद्गगिलोवामदनंगिलतीतिवामदंगिलोवामुद्गिलोवाभा

र्म्यश्वोभृम्यश्वस्यपुत्रोभृम्यश्वोभृमयोऽस्याश्वाअश्वभरणाद्वा॥पितुरित्यन्न
नामपातेर्वापिबतेर्वाप्यायतेर्वातस्यैषाभवति॥२४॥पितुंनुस्तोषंमहोधर्माणं
तविषीं॥यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत्॥तंपितुंस्तौमिमहतोधारयितार
ंबलस्यतविषीतिबलनामतवतेर्वावृद्धिकर्मणोयस्यत्रितओजसाबलेनाभि
मस्त्रिस्थानइंद्रोवृत्रंविपर्वाणंव्यर्दयतीतिनद्योव्याख्यातास्तासामेषाभव
ति॥ ॥२५॥इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्या
मरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया॥इममेगंगेयमुनेसरस्वति॥शु
तुद्रिपरुष्णिस्तोमंमासेवध्वमासिक्न्याचसहमरुद्वृधेवितस्तयाऽऽर्जी
कीयआशृणुहिसुषोमयाचेतिसमस्तार्थोऽथैकपदनिरुक्तंगंगागमनाद्वा

मुनाप्रयुवतीगछतीतिवाप्रवियुतंगछतीतिवासरस्वतीसरइत्युदकनामसर्त्तेस्त
२९ द्वतीशुतुद्रीशुतुद्राविणीक्षिप्रद्राविण्याशुतुन्नेवद्रवतीतिवैरावतींपरुष्णीत्याहुः
पर्ववतीभास्वतीकुटिलगामिन्यसिक्न्यशुक्लासितासितमितिवर्णनामतत्प्रतिषे
धोऽसितंमरुद्वृधाःसर्वानद्योमरुतएनावर्धयंतिवितस्ताविदग्धाविवृद्धामहा
कूलार्जीकीयांविपाळित्याहुर्ऋजूकप्रभवावाऋजुगामिनीवाविपाट्विपाटनाद्वा
विपाशनाद्वाविप्रापणाद्वापाशाअस्यांव्यपाश्यंतवसिष्ठस्यमुमूर्षतस्तस्मा
द्विपाळुच्यतेपूर्वमासीदुरुंजिरासुषोमासिंधुर्यदेनामभिप्रसुवंतिनद्यःसिंधुः
स्यंदनादापआप्नोतेस्तासामेषाभवति॥२६॥आपोहिष्ठामयोभुवस्तानऊर्जेद २९
धातन॥महेरणायचक्षसे॥आपोहिस्थसुखभुवस्तानोऽन्नायधत्तमहतेचनो

कशाप्रकाशयतिभयमश्वायकृष्यतेर्वाणूभावाद्वाक्पुनःप्रकाशयत्यर्थान्कशयात्क्रो
शतेर्वाऽश्वकशायाएषाभवति॥१०॥आजंघंतिसान्वेषांजघनाँउपजिघ्नते॥अश्वाज
निप्रचेतसोऽश्वान्त्समत्सुचोदय॥आघ्नंतिसानून्येषांसरणानिसक्थीनिसक्थिसचतेरा
सक्तोऽस्मिन्कायोजघनानिनिवापघ्नतिजघनंजंघन्यतेरश्वाजनिप्रचेतसःप्रवृद्धचेत
सोऽश्वान्त्समत्सुसमरणेषुसंग्रामेषुचोदय॥उलूखलमुरुकरंवोर्ध्वखंवाऊर्ध्वखंवोरु
मेकुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरंवैतदुलूखलमित्याचक्षतेपरोक्षेणेतिच
ब्राह्मणंतस्यैषाभवति॥११॥यच्चिद्धित्वंगृहेगृहउलूखलकयुज्यसे॥इहद्युमत्तमंवद मं
जयतामिवदुंदुभिः॥इतिसानिगदव्याख्याता॥१२॥वृषभःप्रजांवर्षतीतिवाऽतिबृहति
रेतइतिवातद्वृषकर्मावर्षणाद्वृषभसर्पस्तस्यैषाभवति॥१३॥न्यक्रंदयन्नुपयंतएनममे
हयन्वृषभंमध्यआजेः॥तेनसूभर्वंशतवत्सहस्रंगवांमुद्गलःप्रधनेजिगाय॥न्यक्रं

रणायरमणीयायवदङ्गनायौषधयओषध्धयंतीतिवौषत्येनाधयंतीतिवा
दोषंधयंतीतिवातासामेषाभवति॥२७॥याओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥
मनैनुबभ्रूणामहंशतंधामानिसप्तच॥याओषधयःपूर्वाजातादेवेभ्यस्त्रीणियु
गानिपुरामन्येनुतद्बभ्रूणामहंबभ्रुवर्णानांहरणानांभरणानामितिवाशतंधामा
निसप्तचेतिधामानित्रयाणिभवंतिस्थानानिनामानिजन्मानीतिजन्मान्यत्राभि
प्रेतानीसप्तशतंपुरुषस्यमर्मणांतेष्वेनादधातीतिवा॥रात्रिर्व्याख्यातातस्याएषा
भवति॥२८॥आरात्रिपार्थिवंरजःपितरःप्रायुधामभिः।दिवःसदांसिबृहतीवितिष्ठ
र्त सआत्वेषंआत्वेषंवर्धतेतमः॥आपूपारस्त्वंरात्रिपार्थिवंरजःस्थानैर्मध्यमस्यदिवः
सदांसिबृहतीमहतीवितिष्ठसआवर्ततेत्वेषंतमोऽरण्यान्यरण्यस्यपत्न्य

नि०उ०

२७

रण्यमापर्ण्भवतियामादरमणंभवनीतिवातस्याएषाभवति॥१९॥अरण्यान्यर
ण्यान्यसौयाप्रेवनश्यसि॥कथाग्रामंनपृछसिनत्वाभीरिवविंदती॥अरण्यानीत्ये
नामामंत्रयतेयासावरण्यानिवनानिपराचीवनश्यसि॥कथंग्रामंनपृछसिनत्वा
भीर्विंदतीवेतीवः॥परिक्षयार्थेवाश्रद्धाश्रद्धानात्तस्याएषाभवति॥२०॥श्रद्धयाग्निः
समिध्यतेश्रद्धयाहूयतेहविः॥श्रद्धांभगस्यमूर्धनिवचसावेदयामसि॥श्रद्धया
ग्निःसाधुसमिध्यतेश्रद्धयाहविःसाधुहूयतेश्रद्धांभगस्यभागधेयस्यमूर्धनिप्र
धानांगेवचनेनावेदयामःपृथिवीव्याख्यातातस्याएषाभवति॥२१॥स्योनापृथिवि २७
भवानृक्षरानिवेशनी॥यछानःशर्मसप्रथः॥सुखानःपृथिवीभवाऽनृक्षरानिवेशन्यृ
क्षरःकंटकऋछतेःकंटकःकतपोवाहृततेर्वाकंटतेर्वास्याइतिकर्मणउइततमोभवति

२८ मासीदंतु वामुपस्थमुपस्थानमद्रोग्धव्येइतिवायज्ञियौयादेवायज्ञसंपादिनइहाध
सोमपानाय द्यावापृथिव्यो व्याख्याते तयोरेषा भवति॥३३॥ द्यावानः पृथिवीइमंसि
ध्रमद्यदिविस्पृशं॥ यज्ञंदेवेषुयच्छतां॥ द्यावापृथिव्योनइमंसाधनमद्यदिविस्पृशं॥
छु यज्ञंदेवेषुयच्छतां॥ विपाट्छुतुद्र्यौव्याख्याते तयोरेषा भवति॥३४॥ प्रपर्वतानां
मुशतीउपस्थादश्वेइवविषितेहासमाने॥ गावेवशुभ्रेमातरारिहाणेविपाट्छुतुद्री
पयसाजवेते॥ पर्वतानामुपस्थादुपस्थानादुशत्यौकामयमानेअश्वेइवविमुक्तेइ
तिवाविषण्णेइतिवाहासमानेहासतिःस्पर्धायांहर्षमाणेवागावाविवशुभ्रेशोभ
नेमातरौसंरिहाणेविपाट्छुतुद्र्यौपयसाप्रजवेते॥ आर्त्नीआर्तन्यौवाअरण्योवाअरि २८
ण्योवातयोरेषाभवति॥३५॥ तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामुपस्थे॥

अपशत्रून्विध्यतांसंविदानेआर्त्नीइमेविष्फुरंतीअमित्रान्॥ तेआचरंत्यौसमनसा
विवयोषमातेवपुत्रंबिभृतामुपस्थउपस्थाने॥ अपविध्यतांशत्रून्संविदानेआर्त्न्यौ
इमेविघ्नत्यावमित्रान्॥ शुनासीरौ शुनोवायुः शुपत्यंतरिक्षेसीरआदित्यःसरणात्तयो
रेषाभवति॥३६॥ शुनासीराविमांवाचंजुषेथांयद्दिविचक्रथुःपयः॥ तेनेमामुपसिं
चतं॥ इतिसानिगदव्याता॥ देवीजोष्ट्रीदेव्यौजोषयित्र्यौ द्यावापृथिव्याविति वाहो
रात्रेइतिवासस्यंचसमाचेतिकात्थक्यस्तयोरेषैषप्रेषोभवति॥३७॥ देवीजोष्ट्रीव
सुधितीययोरन्याघाद्वेषांसियूयवदान्यावक्षद्वसुवार्याणियजमानायवसुव
नेवसुधेयस्यवीतांयज॥ देवीजोष्ट्रीदेव्यौजोषयित्र्यौवसुधितीवसुधान्यौययोर
न्याघानिद्वेषांस्यवयावयवत्यावहत्यन्यावस्तनिवननीयानियज्ञमानायवव

२९ सुवननायववसुधननायववीलांपिबेतांकामयेलांवायजेतिसंप्रैषोदेवीऊर्जा

हुतीदेव्याऊर्जाह्वान्योद्यावापृथिव्याविलिवाऽहेरात्रेइतिवासस्यंचसमावेतिकाथ

क्यपत्नयोरेषसंप्रैषोभवति॥४२॥देवीऊर्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीति

मन्यावनेनपूर्वंदयमाना:स्यामपुराणेननवंतामूर्जमूर्जाहुतीऊर्जयमानेअधा

तांवसुवनेवसुधेयस्यवीतांयज॥देवीऊर्जाहुतीदिव्याऊर्जाह्वान्यावन्नेंसंचावहत्या २२

वहत्यन्यासहजग्धिंवसहपीतिंवान्या:नवेनपूर्वंदयमाना:स्यामपुराणेननवंताम्

ऊर्जमूर्जाहुतीऊर्जयमानेअधातांवसुवननायचवसुधननायचवीतांपिबेतांकाम

येतांवायजेतिसंप्रैषोयजेतिसंप्रैष:॥४३॥ अथयद्युखलु॥अथयान्यध्वोवोदुसम

नोमित्र:कनिक्रदद्द्वदत्संवत्सरमुपप्लवदआवेपा:प्रेतेवदत्वमदान्यज्ञसंयोगा

यत्कुन:शर्मयच्छतुशरणंसर्वत:पृथ्वद्याव्याख्यातातस्याएषाभवति॥४१॥अमीषांचि

त्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि॥अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तम

सासचंतां॥अमीषांचित्तानिप्रज्ञानानिप्रतिलोभयमानागृहाणांगान्यप्वेपरेह्यभिप्रेहि

निर्दहैषांहृदयानिशोकैरंधेनामित्रास्तमसासंसेव्यंताम्याप्यग्ने:पत्नीतस्याएषाभ

वति॥४२॥इहेंद्राणीमुपह्वयेवरुणानींस्वस्तयेअग्नायींसोमपीतयेइतिसानिगद

व्याख्याता॥४४॥अथयातोष्टोईद्रान्युलूखलमुसलेउलूखलंव्याख्यातंमुसलंमुहु:

सरतयोरेषाभवति॥४५॥आयजीवाजसातमाताह्युच्चाविजर्भृत:॥हरीइवांसि धां

बप्सता॥आयष्टव्येअन्नानांसंभक्तमेतस्कस्वैविज्ञियेतेहरीइवाचानिभुंजानेहविषां

निधानेतयोरेषाभवति॥४६॥आवामुपस्थमद्रुहादेवा:सीदंतुयज्ञिया:इहाद्यसोमपीतये॥

द्रुनस्पतउपश्वासयबह्वीनामहिरिवभोगैःपर्येतिबाधंधन्वनागावक्ष्यंतीवसुपर्णंव
स्त्रअजंघंतियाक्षिप्रिष्टिंवृषभोन्यक्रंदयानिर्मितपुलुन्विर्मंमआपोहिष्ठाओषधीरा
रात्रिमरण्यानिश्रद्धयास्योनामीष्वामिहेन्द्राणीमथालोष्टायजीआवामुपस्थंद्यावामः
प्रपर्वतानांतेआवरंतीशुनासीरोदेवजोष्टीदिवीकुजौकुर्तीत्रिचत्वारिंशत्॥ ॥४३॥इ
तिनिरुक्तेनवमोध्यायः॥ ॥हरिःओम्॥अथातोमध्यस्थानादेवतास्तासांवायुःप्रथ
मागामीभवतिवायुर्वातेर्वेतेर्वास्याद्गतिकर्मणएतेरितिस्थौलाष्ठीविरनर्थको
वकारःतस्यैषाभवति॥१॥वायवायाहिदर्शतेमेसोमाअरंकृताः॥तेषांपाहिश्रुधी
हवं॥वायवायाहिदर्शनीयेमेसोमाअरंकृताअलंकृतास्तेषांपिबशृणुनोह्वानमि
ति कमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥२॥आसस्त्राणासःशवसान

मघेंद्रं सु चक्रे रथ्यासो अश्वाः ॥ अभि श्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं
विदस्येत् ॥ आससस्वांसो ऽभिबलायमानमिंद्रं कल्याणचक्रे रथे योगाय रथ्या
अश्वा रथस्य वोढार ऋज्यंत ऋजुगामिनो ऽन्नमभिवहेयुर्नवं च पुराणं च श्रव
इत्यन्ननाम श्रप तद्धातस्ततो वायोश्चास्य भक्षो यथा न विदस्येदितींद्रप्रधाने
त्येके नैघंटुकं वायुकर्मोभयप्रधानेत्यपरं वरुणो वृणोतीति सतस्तस्यैषा भ
वति ॥३॥ नीचीबारं वरुणः कबंधं प्र ससर्ज रोदसी अंतरिक्षं ॥ तेन विश्वस्य भुव
नस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥ नीचीनद्वारं वरुणः कबंधं मेघं कवनमुद
कं भवति तदस्मिन्धीयत उदकमपि कबंधमुच्यते बंधिरनिभृतत्वे कमनिभृतं
च प्रसृजति द्यावापृथिव्यो चांतरिक्षं च महत्त्वेन तेन सर्वस्य भुवनस्य राजा यवमि

उ०नि०

रताऽश्टणोतु नः॥ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्नेऽषाढाय
॥३१॥ सहमानाय वेधसे॥ तिग्मायुधाय भरता शृणोतु नः॥ तिग्मं तेजतेरुत्साहकर्मणः
आयुधमायोधनात्तस्यैषा भवति॥ ६॥ याते दिद्युदवसृष्टा दिवस्परि क्ष्मया च
रति परि सा वृणक्तु नः॥ सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः॥
याते दिद्युदवसृष्टा दिवस्परिक्ष्मया चरति परि सा वृणक्तु नः॥ दिवोऽधि दिद्यु
द्यतेर्वा द्योततेर्वा क्ष्मया चरति क्ष्मा पृथिवी तस्यां चरति तया चरति विक्ष्मापयन्ती
चरतीति वा परिवृणक्तु नः सा सहस्रं ते स्वप्तवचन भेषज्यानि मा नस्त्वं पुत्रेषु पौ
त्रेषु च रीरिषस्तोके तुद्यते स्तनयं तनोते रग्निरपि रुद्र उच्यते तस्यैषा भवति॥ ॥३१॥
७॥ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय॥ स्तोमं रुद्राय दृशीकं॥ जरास्तु

तिर्जरतेः स्तुतिकर्मणस्तां बोधत पा बोधयितरिति वा तद्विविड्ढि तत्कुरु मनुष्यस्य
मनुष्यस्य यजमानाय स्तोमं रुद्राय दर्शनीयं मिंद्र इरां दृणातीति वेरां दरतीति वेरां दधा
तीति वेरां दारयतीति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति
त्व वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायत इदं करणादित्याग्रायण इदं दर्श
नादित्यौपमन्यव इदं नतेर्वैश्वर्यकर्मण इदं छत्रूणां दारयिता वा द्रावयिता वा दार
यिता च यज्वनां तस्यैषा भवति॥ ८॥ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्ब
धानां अरम्णाः॥ महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्॥ अदृणा
उत्समुत्सरणादुत्स्यन्दनादुन्दनाद्वा व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतान्मा
ध्यमिकान्संस्त्यायान्बाबध्यमानान् अरम्णा अरम्णातिः संयमनकर्मा विसर्जनकर्मा वा

उ०नि० ॥२२॥

महांतमिंद्रंपर्वतंमेघंयद्वृत्रपोव्यसृजोऽस्यधारा अवहत्तेनदानवंदानवकर्मणांत
स्यैषापराभवति॥९॥योजातएवप्रथमोमनस्वान्देवोदेवान्क्रतुनापर्यभूषत्।यस्यशु
ष्माद्रोदसीअभ्यसेतांनृम्णस्यमह्नासजनासइंद्रः॥योजातएवप्रथमोमनस्वीदेवोदेवान्क्र
तुनाकर्मणापर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदितिवायस्यबलाद्द्यावापृथिव्या
वप्यबिभीतांनृम्णस्यमह्नाबलस्यमहत्वेनसजनासइंद्रइत्यृषेर्दृष्टार्थस्यप्रीतिर्भ
वत्याख्यानसंयुक्ता॥पर्जन्यस्तृपेराद्यंतविपरीतस्यतर्पयितजन्यःपरोजेतावा
जनयितावाप्रार्जयितावारसानांतस्यैषाभवति॥१०॥विवृक्षान्हंत्युतहंतिरक्षसो
विश्वंबिभायभुवनंमहावधात्।उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यस्तनयन्हंति ॥२२॥
दुष्कृतः॥विहंतिरक्षांसिविभिहंतिवरक्षांसिचसर्वाणिवास्माद्भूतानिबिभ्यतिमहा

वृषिःस्तुनातिप्रस्तमितस्यैषापराभवति॥४॥तम्बुसमनागिरापितॄणांचमन्मभिः॥नाभा
कस्यप्रशस्तिभिर्यःसिंधूनामुपोदयेसप्तस्वसासमध्यमोनभंतामन्यकेसमे॥
तमुभिस्तोभिःसाम्नयागिरागीत्यास्तुत्यापितॄणांचमननीयैस्तोमैर्नाभाकस्य
प्रशस्तिभिर्ऋषिर्नाभाकोबभूवयःस्यंदमानानामासामपामुपोदयेसप्तस्वसा
रमेनमाहवाभिःसमध्यमइतिनिरुच्यतेऽथैषएवभवति।नभंतामन्यकेसमे।
माभूवन्नन्यकेसर्वेयेनोद्विषंतिदुर्धियःपापधियःपापसंकल्पा।रुद्रोरौतीतिस
तोरोरूयमाणोद्रवतीतिवारोदयतेर्वा।यदरुदत्तद्रुद्रस्यरुद्रत्वमितिकाठकं।यदरोद
त्तद्रुद्रस्यरुद्रत्वमितिहारिद्रविकं।तस्यैषाभवति॥५॥इमारुद्रायस्थिरधन्वने
गिरःक्षिप्रेषवेदेवायस्वधाव्ने॥अषाढायसहमानायवेधसेतिग्मायुधायभ

ह्यस्यवधोप्यनपरोधोभीतःपालयतेवर्षकर्मवतो॥ यत्पर्जन्यस्तनन्होलितिदुष्कृतः॥
पापकृतो॥ बृहस्पतिर्बृहतःपातावापालयितावातस्यैषाभवति॥११॥ अश्मापिनद्धंमधु
पर्यपश्यन्मत्स्यंनदीनउदनिक्षियंतं॥ निष्टज्जभारचमसंनवृक्षाद्बृहस्पतिर्विरवेणा॥वि वे
कृत्यं॥ अश्नानवतामेघेन॥ पिनापिनद्धंमधुपर्यपश्यन्मत्स्यंनदीनउदकेनिवसंतं
निर्जहारतच्चमसमिववृक्षाच्चमसःकस्माच्चमंत्यापोऽस्मिन्निति बृहस्पतिर्विरवेणाश स्मादापो
ब्देनविकृत्य॥ ब्रह्मणस्पतिर्ब्रह्मणःपातावापालयितावातस्यैषाभवति॥१२॥ अश्मा
स्यमवतंब्रह्मणस्पतिर्मधुधारमभियमोजसातृणत्॥ तमेवविश्वेपपिरेस्वर्दृशोबहुसाकं
सिसिचुरुत्समुद्रिणं॥ अश्नापनवंतमास्यमेघनवंतमवातितंब्रह्मणस्पतिर्मधुधारमभियमोजसा
बलेनाभ्यतृणत्तमेवसर्वेपिबंतिरश्मयःसूर्यदृशोबहुनेसहासिंचन्नुत्समुद्रिणमुदकवंतं॥१३॥

३/५ (५५)

उ०त्रि० ॥७७॥

क्षेत्रस्यपतिः क्षेत्रंक्षियतेनिवासकर्मणस्तस्यपातावापालयितावातस्यैषाभवति॥१८॥
क्षेत्रस्यपतिनावयंहितेनेवजयामसि॥गामश्वंपोषयित्न्वासनोमृळातीदृशे॥क्षेत्रस्यप
तिनावयंसुहितेनेवजयामो गामश्वंपुष्टंपोषयितृवाहरेतिसनोमृळयातीदृशे॥बलेनवा
धनेनवामृळयातिमृळतिर्दानकर्मातस्यैषापराभवति॥१५॥क्षेत्रस्यपतेमधुमन्तमूर्मिंधे
नुरिवपयोअस्मासुधुक्ष्व॥मधुश्चुतंघृतमिवसुपूतमृतस्यनःपतयोमृळयन्तु॥क्षेत्र
पतेमधुमन्तमूर्मिंधेनुरिवपयोऽस्मासुधुक्ष्वेति।मधुश्चुतंघृतमिवोदकंसुपूतमृ
तस्यनःपातारोवापालयितारोवामृळयन्तुमृळयतिरुपदयाकर्मापूजाकर्मावातद्धि ॥७७॥
समान्यामृचिसमानाभिव्याहारंभवतिजामिभवतीत्येकंमधुमन्तमधुश्चुतमि
तियथायदेवसमानेपादेसमानाभिव्याहारंभवतिजामिभवतीत्यपरंहिरण्यरूपः

2.04